# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-१ (SEM-1) | प्रश्नपत्र-४ | गुणा: - ७० |
| विषय:- कर्मकाण्डम् | OE111 | समय: - ०३ त: ०६ |
| दिनाङ्क: - ०८/१२/२०१६ | सन्दर्भग्रन्थ: - सर्वदेवपूजाप्रयोग: | |

**॥ प्रथमान्विति: ॥**

**प्र-१ कयोश्चित् द्वयो: मन्त्रयो: ससन्दर्भं व्याख्या कार्या ।** **०८**

१. देवानाम्भद्रासुमतिर्ऋजूयतान्देवाना ꣳ रातिरभिनोनिवर्तताम् ।
देवाना ꣳ सक्ख्यमुपसेदिमां व्वयन्देवानऽआयु: प्प्रतिरन्तु जीवसे ॥

२. पृषदश्वामरुत: पृश्निमातर: शुभंय्यावानोव्विदथेषु जग्ग्मय: ।
अग्निजिह्वामनव: सूरचक्षसोव्विश्श्वेनो देवाऽअवसागमन्निह ॥

३. अग्निर्ऋषि: पवमान: पाञ्चजन्य: पुरोहित: । तमीमहे महाज्यम् ।
उपयामगृहीतोस्यग्ग्नये त्वाव्वचसऽएषते योनिरग्ग्नये त्वाव्वर्च्चसे ॥

**प्र-२ सुमुखश्चैकादि विलिख्य प्राणायाममहत्त्वं लिखन्तु ।** **०८**

**अथवा**

**कङ्कणबन्धनप्रयोग: वेदोक्तपुराणोक्तेन विलिख्य सूर्यदीपपूजनमहत्त्वं लिखतु ।**

**प्र-३ कयोश्चित् द्वयो: टिप्पणीं कुरुत ।** **०४**

१. आचमनप्राणायामप्रयोग: ।

२. शङ्खघण्टानादध्वनिविचार: ।

३. भद्रसूक्तपाठेन लाभ: ।

४. स्वस्तितिलकम् ।

**प्र-४ केषाञ्चित् पञ्चानां लघूत्तराणि देयानि ।** **०५**

१. आ नो भद्रा: इति शब्दस्य अर्थं लिखतु ।

२. स्वस्ति न इन्द्रो... इति मन्त्रे कति वारं स्वस्तिशब्द: ?

३. यदाबध्नन् इति मन्त्रस्य प्रयोजनं किम् ?

४. आरोग्यं केन देवेन प्राप्यते ?

५. आचमनं कति वारं भवति ?

६. प्राणायाम: कति प्रकारा: सन्ति ? के च ते ?

७. यजमानपत्न्या: कङ्कणबन्धनं कस्मिन्हस्ते भवति ?

**॥ द्वितीयान्विति: ॥**

**प्र-५ कयोश्चित् द्वयो: मन्त्रयो: ससन्दर्भं व्याख्या कार्या ।** **०८**

१. रक्षोहा विश्वचर्षणि रभियोनि मयो हते ।
द्रोणे सधस्थ मासदत् ॥

२. तत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भि: ।
अहेडमानो व्वरुणे ह बोध्युरुष ꣳ समान आयु: प्रमोषी: ॥

३. आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।

हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

**प्र-६ प्रधानसङ्कल्पः लेख्यः ?** **०८**

**अथवा**

**दिग्रक्षणं कैः मन्त्रैः क्रियते ?**

**प्र-७ एकस्य टिप्पणी कार्या ।** **०२**

१. कलशस्थापनम् ।

२. गणेशाम्बिकयोः ध्यानम् ।

**प्र-८ कयोश्चित् द्वयोः लघूत्तरौ देयौ ।** **०२**

१. सङ्कल्पे पञ्चाङ्गस्य प्रयोगं लिखतु ।

२. चतुर्दिक्षु कलशस्य केषां पूजनं भवति ?

३. पञ्चायतनदेवानां नामानि लिखन्तु ।

४. सर्षप इत्याख्यस्य विनियोगः कुत्र भवति ?

**॥ तृतीयान्वितिः ॥**

**प्र-९ कयोश्चित् द्वयोः ससन्दर्भं व्याख्या कार्या ।** **०८**

१. पुरुषऽएवेद ँ सर्वं यद्भूतँ यच्च भाव्यम् ।

उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥

२. तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् ।

पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥

३. पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः ।

सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥

**प्र-१० समीक्षा कार्या ।** **०८**

१. षोडशोपचारपूजनम् ।

अथवा

२. पूजायाः प्रयोगे आवश्यकसामग्र्यः ।

**प्र-११ द्वयोः टिप्पणी कार्या ।** **०४**

१. स्नानप्रकाराः ।

२. पूजासमये स्नानम् ।

३. देवस्य शुद्धोदकस्नानप्रयोगः ।

४. देवस्य यज्ञोपवीतम् ।

**प्र-१२ पञ्चानां लघूत्तराणि लिखन्तु ।** **०५**

१. अर्घ्यदानप्रयोगे कः मन्त्रः ?

२. तीर्थस्नानमन्त्रः कः ?

३. पञ्चामृतनामानि लिखन्तु ।

४. दुर्वा कस्मै देवाय प्रदीयते ?

५. वस्त्रान्ते किं कर्तव्यम् ?

६. अन्नपतेन... मन्त्रेण कः उपचारः भवति ?

७. अङ्गपूजा केन द्रव्येण भवति ?